# साहित्यम्/PUC

कक्ष्येयं वर्षद्वयावधिकी । तत्र प्रथमे वर्षे समवायेन षट् (६) पत्रिकाः सन्ति । तासु आदिमं द्वयं भाषासम्बद्धम्, (प्रथमाभाषा संस्कृत-कन्नडयोरन्यतमा, द्वितीयाभाषा आङ्ग्ल-हिन्दीभाषयोः अन्यतमा) भाषाविषये पदवीपूर्वकक्ष्यायाः प्रथमवर्षस्य (PUC-I) यत्पाठ्यपुस्तकं तदेवात्रापि निर्णीतम् । अन्यस्य च पत्रिकाचतुष्टयस्य क्रमेण साहित्यसोपानम् -१. साहित्यसोपानम् -२. व्याकरणसोपानम्, तर्कसोपानं च पाठ्यपुस्तकत्वेन निर्णीतमस्ति । अत्र प्रवेशनियमः तावदयम् -

१. काव्यपरीक्षायाम् उत्तीर्णत्वम् ।
२. सामान्यशिक्षणे दशमकक्ष्यापरीक्षायां संस्कृतपत्त्रिकायाम् उत्तीर्णत्वम् ।
३. मुम्बयिनगरीयस्य भारतीयविद्याभवनस्य 'कोविदः' इति परीक्षायाम् उत्तीर्णत्वम् ।
४. शृङ्गगिरिस्थायाः श्रीसुरसरस्वतीसभायाः 'प्रवेशः' इति परीक्षायाम् उत्तीर्णत्वम् ।
५. बेङ्गळूरुनगरस्थायाः संस्कृतभारत्याः 'प्रवेशः' इति परीक्षायाम् उत्तीर्णत्वम् ।
६. दशमकक्ष्यायाः तत्समानकक्ष्याया वा परीक्षायाम् उत्तीर्णत्वम् ।

एतेषु अन्यतमा अर्हता अपेक्ष्यते ।

**सूचना :** सामान्यशिक्षणे ये तावत् दशमकक्ष्यापरीक्षायां संस्कृतं नोत्तीर्णाः तेषां साहित्यस्य प्रवेशे कर्तव्ये संस्कृतज्ञाननिर्णयार्थं महाविद्यालयेन कार्यायां परीक्षायाम् उत्तीर्णत्वमपेक्ष्यते ।

द्वितीयेवर्षेऽपि समवायेन षट् (६) पत्रिकाः पूर्ववत् । तासु आदिमं द्वयं भाषासम्बद्धम् , (प्रथमाभाषा संस्कृत -कन्नडयोः अन्यतमा , द्वितीयाभाषा पुनः आङ्ग्ल -हिन्दीभाषयोः अन्यतमा) भाषाविषये पदवीपूर्वकक्ष्याया द्वितीयवर्षस्य (PUC-II) यत्पाठ्यपुस्तकं तदेवात्रापि निर्णीतम् । त तोऽन्यस्य पत्रिकाचतुष्टयस्य क्रमेण साहित्यसौरभम् -१ , साहित्यसौरभम् -२ , व्याकरणसौरभम्, तर्कसौरभं च पाठ्यपुस्तकत्वेन निर्णीतमस्ति । अत्र प्रवेशस्य नियमस्तावत् साहित्यप्रथमवर्षीयपरीक्षायाम् उत्तीर्णत्वम् ।

# पाठ्यम्

## १. प्रथमवर्षम्

| पत्रिका पाठ्यम् | पाठ्यपुस्तकम् | अङ्काः |
|---|---|---|
| १. संस्कृतम्/कन्नडम् | प्रथम पि.यु.सि पाठ्यपुस्तकम् | १०० |
| २. हिन्दी/आङ्ग्लम् | प्रथम पि.यु.सि. पाठ्यपुस्तकम् | ; |
| ३. पद्यम्, गद्यम्, अलङ्कारादि | साहित्यसोपानम्-१. | ; |
| ४. नाटकम्, चम्पूः, छन्दःप्रभृति | साहित्यसोपानम्-२. | ; |
| ५. व्याकरणम् | व्याकरणसोपानम् | ; |
| ६. तर्कः | तर्कसोपानम् | ; |

## २. द्वितीयवर्षम्

| पत्रिका पाठ्यम् | पाठ्यपुस्तकम् | अङ्काः |
|---|---|---|
| १. संस्कृतम्/कन्नडम् | द्वितीय पि.यु.सि पाठ्यपुस्तकम् | १०० |
| २. हिन्दी/आङ्ग्लम् | द्वितीय पि.यु.सि. पाठ्यपुस्तकम् | ; |
| ३. पद्यम्, गद्यम्, अलङ्कारादि | साहित्यसौरभम्-१. | ; |
| ४. नाटकम्, चम्पूः, छन्दःप्रभृति | साहित्यसौरभम्-२. | ; |
| ५. व्याकरणम् | व्याकरणसौरभम् | ; |
| ६. तर्कः | तर्कसौरभम् | ; |